दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-92 | 1 | जनवरी 23, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् माघशुक्लपञ्चमी
माघ 10 प्रविष्टांशः मङ्गलमयः भवेत्

2 हिमाचलप्रदेशस्य ६,७१४ सर्वकारी विद्यालयेषु सर्वेक्षणं सम्पन्नम्, परिणामानुसारं संशोधनानि क्रियन्ते

3 महाविद्यालयेषु शिक्षकाणां ४०० पदानि पूरयिष्यन्ते; लोकसेवा-आयोगाय प्रेषितं प्रकरणम्

5 भारतीयज्ञानपरम्परायां वसन्तपंचमीपर्वणः आध्यात्मिकं वैज्ञानिकं च दृष्टिकोणम्

## झारखण्ड-राज्ये सुरक्षाबलेन वरिष्ठः माओवादि-नेता अनल-दा इत्यमुं समेत्य दशाधिकाः माओवादिनः मारिताः

**हिमसंस्कृतवार्ताः** - झारखण्ड-राज्ये पश्चिम सिंहभूम-मण्डले नक्सल-विरोधी अभियाने सुरक्षाबलेन द्वन्द्वे दशतोप्यधिकाः माओवादिनः मारिताः। प्रातःकाले सी. पी. आई. (माओवादि) विद्रोहिणां विरुद्धं सुरक्षाप्रक्रियायां गोलिकाप्रहारम् आरब्धम्। मृतेषु वरिष्ठः माओवादी नेता पातिराम् माझी, अथवा अनल दा सम्मिलितः आसीत्, यो हि एककोटि-रूप्यकाणां पारितोषिकं धारयति। सः गिरिडिह-मण्डलस्य निवासी आसीत्।

## जम्मू-कश्मीर-प्रदेशे डोडा-जनपदस्य खन्नी-टॉप इत्यत्र मार्गात् सैन्य-ट्रक्-यानम् अपक्रम्य खत्यां पतनेन दशसैनिकाः मृताः, एकादश जनाः च व्रणिताः



**हिमसंस्कृतवार्ताः** - जम्मू-कश्मीर्-प्रदेशे डोडा-जनपदस्य खन्नी-टॉप इत्यत्र मार्गात् सैन्य-ट्रक्-यानम् अपक्रम्य खत्यां पतनेन दशसैनिकाः मृताः, एकादश जनाः च व्रणिताः अभवन्। चत्वारः घटनास्थले एव मृताः, षट् च पश्चात् मृताः । सेनया आरक्षिबलेन च संयुक्त-उद्धारकार्यम् तत्क्षणमेव प्रारब्धम्। व्रणिताः दशसैनिकाः उधमपुर-कमाण्ड-चिकित्सालयं प्रति वायुमार्गेण नीताः, एकः भद्रवाह-उपमण्डलीय-चिकित्सालये निरीक्षणे अस्ति। उपराज्यपालः मनोज सिन्हा, मुख्यमन्त्री उमर अब्दुल्ला, रक्षामंत्री राजनाथ सिंहः च घटनायां शोकं प्रकटितवन्तः ।

## विकास-परियोजनानां उद्घाटनाय, रेलयानानां हरित-ध्वजं प्रदर्शनाय च प्रधानमन्त्री नरेन्द्र मोदी अद्य केरल राज्यं गमिष्यति



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्री नरेन्द्रमोदी अद्य केरल राज्यं गमिष्यति, यत्र सः तिरुवनंतपुरं-नगरे अनेकासां विकास-परियोजनानां शिलान्यासं, उद्घाटनं, लोकार्पणम् च करिष्यति, तत्र एकं जनसमूहं अपि सम्बोधयिष्यति। एतासु परियोजनासु रेल-सम्पर्कः, नगरीय-आजीविका, विज्ञान-नवान्वेषणम्, स्वास्थ्यसेवा, नागरिकसेवा च सम्मिलिताः सन्ति, यस्य उद्देश्यं समावेशकवृद्धिः, जीवनस्य गुणवत्तायां परिष्कारः च अस्ति। प्रधानमन्त्री चतुर्णां रेलयानानां हरितध्वजं प्रदर्शयिष्यति येषु त्रीणि अमृतभारत् एक्स्प्रेस् रेलयानानि सन्ति। सः वीथि-विक्रेतुभ्यः वित्तीय समावेशनं सुदृढीकरणाय पी एम् स्वनिधि-क्रेडिट्-काई इत्यस्य आरम्भं करिष्यति तथा च एकलक्ष-लाभार्थीनां कृते पी एम् स्वनिधि ऋणस्य वितरणम् करिष्यति। विज्ञान-नवान्वेषणक्षेत्रे च श्रीमोदी सी. एस्.आई.आर्. एन्.आई.आई.एस्.टि. नवान्वेषण-प्रौद्योगिकी-उद्यमशीलता-हव्इत्यस्य शिलान्यासं करिष्यति। स्वास्थ्यसेवायां, सः श्रीचित्र-तिरुनाळ्-संस्थाने रेडियोसर्जरी-केन्द्रस्य शिलान्यासम् अपि करिष्यति, येन उन्नत-चिकित्सा सेवा वर्धिता भविष्यति ।


## सर्वोच्चन्यायालयेन मध्यप्रदेशस्य धार-जनपदस्य विवादित-भोजशाला-कमल-मौला-मस्जिद इत्यत्र वसन्तपञ्चम्यवसरे सूर्योदयात् सूर्यास्तपर्यन्तं प्रार्थनां कर्तुं हिन्दुसमुदायाय अनुमतिः प्रदत्ता

**हिमसंस्कृतवार्ताः** - सर्वोच्चन्यायालयेन मध्यप्रदेशस्य धार-जनपदस्य विवादित-भोजशाला-कमल-मौला-मस्जिद इत्यत्र वसन्तपञ्चम्यवसरे सूर्योदयात् सूर्यास्तपर्यन्तं प्रार्थनां कर्तुं हिन्दुसमुदायाय अनुमतिः प्रदत्ता, तस्मिन् दिने मुस्लिम्-समुदायेभ्यः एकवादनतः त्रिवादन पर्यन्तं प्रार्थनां कर्तुं अनुमतिः प्रदत्ता अस्ति। सर्वोच्चन्यायालयेन निर्दिष्टं यत् प्रार्थनायै आगतानां मुस्लिम्-समुदायस्य जनानां सूचीं जनपद-प्रशासनं प्रति दातव्यम् इति। उभौ समुदायौ शुक्रवासरे भोजशाला-परिसरे धार्मिक-अनुष्ठानाय अनुमतिं याचितवन्तौ, तदैव वसन्तपञ्चमी-अवसरे सरस्वती-पूजा अपि आचर्यते।



भारतस्य मुख्यन्यायाधीशः सूर्यकान्तः, न्यायमूर्ति जॉयमाल्या बागची, न्यायमूर्ति विपुल् एम पञ्चोली च इत्येतेषां पीठेन उभयोः पक्षयोः मध्ये सामञ्जस्यं स्थापयितुं, राज्येन जनपदप्रशासनेन सह विधि-व्यवस्थां स्थापयितुं सहयोगं दातुं च आदिष्टम्। न्यायालयेन जनपदप्रशासनं पूजास्थले विधि-व्यवस्थायै निर्दिष्टम् अस्ति।

## विश्व-आर्थिक-मञ्चे अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्पेन प्रधानमन्त्रिणं नरेन्द्रमोदिनं प्रशंसितम्





**हिमसंस्कृतवार्ताः** - दावोस-नगरे विश्व-आर्थिक-मञ्चे अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्पेन प्रधानमन्त्रिणं नरेन्द्रमोदिनं प्रशंसितम्। श्रीमोदी घनिष्ठमित्रम् इति सम्बोधयन् अमेरिका-देशस्य राष्ट्रपतिः भारत-अमेरिका-देशयोः मध्ये व्यापारसमन्वयं भविष्यति इति आत्मविश्वासं प्रकटितवान्। एषा टिप्पणी तदा अभवत् यदा वाशिङ्गटन्-नवदिल्ली च व्यापार-व्यवहारस्य गतिरोधस्य निराकरणार्थं वार्तालापं निरन्तरं कुर्वन्तौ स्तः। सम्भाव्य-व्यापार-सन्धि-विषये प्रत्यक्षतया प्रश्नस्य उत्तरे राष्ट्रपतिः अवदत् यत् सः उत्तमः व्यवहारः करिष्यति।

**सुभाषितम्**

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।
या ब्रह्माच्युत शंकरप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ।।

भावार्थः- कुन्द, चन्द्र, तुषार के हार के समान गौरवपूर्ण शुभ्र वस्त्र धारण करने वाली,वीणा के सुन्दर दण्ड से सुशोभित हाथों वाली, श्वेत कमल पर विराजित, ब्रह्म,विष्णु महेश आदि सभी देवों के द्वारा सर्वदा स्तुत्य, समस्त अज्ञान और जड़ता की विनाशनी देवी सरस्वती मेरी रक्षा करे।









## भारत-अमेरिका-देशयोः मध्ये वाशिङ्गटन-नगरे त्रिदिवसियं औषध-नीति-कार्यकारि-सम्मेलनम् समाप्तम्



**हिमसंस्कृतवार्ताः** - औषध-नीति-कार्यकारी-समूहस्य त्रि-दिवसीय-उद्घाटन-सम्मेलनम् वाशिङ्गटन्-डी. सी. इत्यत्र समाप्तम्। जनवरी-मासस्य विंशति-दिनाङ्के समारब्धं सम्मेलनं कृत्रिम-ओपि-ओयिड्स्, उदयोन्मुख-मादकद्रव्याणां पूर्वगामिः, डिजिटल्-मञ्चानां दुरुपयोगं च निवारयितुं सहयोगं सुदृढं कर्तुं केन्द्रितम् आसीत्।

# हिमाचलप्रदेशस्य ६,७१४ सर्वकारी विद्यालयेषु
## सर्वेक्षणं सम्पन्नम्, परिणामानुसारं संशोधनानि क्रियन्ते



हिमसंस्कृतवार्ताः- शिमला।समग्रशिक्षाविभागेन हिमाचलप्रदेशे सर्वकारी विद्यालयेषु अध्ययनरत प्रथम– द्वितीय– तृतीयकक्षीय बालकानां मूलसाक्षरता– संख्याज्ञानयोः (एफ़एलएन) आकलनं कृतम्। अस्य सर्वेक्षणस्य परिणामानां आधारेण सुधारात्मकाः उपायाः स्वीकरिष्यन्ते। प्रथमकक्षीय बालकानाम् आधाररेखा– सर्वेक्षणं (Baseline Survey) कृतम्, द्वितीय–तृतीयकक्षीय बालकानां तु अन्तरेखा–सर्वेक्षणं (End Line Survey) सम्पन्नम्। एतत् सर्वेक्षणं प्रदेशस्य ६,७१४ ग्रीष्मकालीनावकाशयुक्तेषु सर्वकारी विद्यालयेषु आयोजितम्। शीतकालीनावकाशयुक्तेषु विद्यालयेषु तु विद्यालयोद्घाटनानन्तरं फरवरीमासे आकलनं भविष्यति।समग्रशिक्षानिदेशकः राजेशशर्मा अवदत् यत् समग्रशिक्षायाः उपक्रमेण अक्तूबर २०२४ मासे प्रथम– द्वितीयकक्षयोः प्रायः ७० सहस्र बालकानां आधाररेखासर्वेक्षणं कृतम्। अस्य सर्वेक्षणस्य आधारेण बालकानां एफ़एलएन–स्तरस्य मूल्यांकनं कृत्वा तेषां शैक्षणिकस्तरवर्धनाय विशेषाः उपायाः अङ्गीकृताः।प्रदेशे ९,७१९ प्राथमिकविद्यालयाः सन्ति, येषु एफ़एलएन सुदृढीकरणाय निरन्तरं प्रयासाः क्रियन्ते। एतेषां प्रयासानां प्रभावमूल्यांकनार्थं समग्रशिक्षाविभागेन १९ तः २१ जनवरीपर्यन्तं प्रथम–द्वितीय–तृतीयकक्षीय बालकानां असेस्मेण्ट आयोजितम्। अस्मात् सर्वेक्षणात् विद्यालयेषु कृतैः सुधारात्मकैः प्रयासैः बालकानां मूलसाक्षरतायां, संख्याज्ञाने च कियत् उन्नतिः जाता इति स्पष्टं भविष्यति।समग्रशिक्षायां निपुणभारत–मिशनस्य समन्वयिका (कोऑर्डिनेटर) डॉ. मञ्जुला शर्मा अवदत् यत् असेस्मेण्टस्य आँकडाः विद्यासमीक्षा–केन्द्रस्य चैटबॉटे उपलब्धाः करिष्यन्ते।

# संस्कृतप्रतियोगितानाम् आयोजनं सिरमौरजनपदस्य
## राजकीये वरिष्ठमाध्यमिके विद्यालये निहालगढ़ इत्यत्र सम्पन्नम्



**हिमसंस्कृतवार्ताः- डॉ. नरेन्द्रराणा सिरमौरः।** हिमाचल-संस्कृत-अकादमी हिमाचल सर्वकारः शिमलाद्वारा वर्षं २०२५-२६ इत्यस्य सत्रस्य कृते विद्यालयीयानां छात्राणां जिलास्तरीय-संस्कृतप्रतियोगितानाम् आयोजनं सिरमौरजनपदस्य राजकीये वरिष्ठमाध्यमिके विद्यालये निहालगढ़ इत्यत्र सम्पन्नम्। छात्रैः सोत्साहेन संस्कृतप्रतियोगितासु सहभागिता कृता। अस्य कार्यक्रमस्य मुख्यातिथिः शिक्षाविभागस्य, सिरमौरजनपदस्य शिक्षा उपनिदेशकः आसीत्। तेन प्रतियोगितासु प्रथमं, द्वितीयं, तृतीयं स्थानं प्राप्तेभ्यः विद्यार्थिभ्यः पुरस्काराः प्रदताः। अस्यां प्रतियोगितायां प्रायः पञ्चत्रिंशत् विद्यालयानां शताधिकं विद्यार्थिनः सहभागितां कृतवन्तः।

कार्यक्रमस्य संयोजकः भगतरामचौहानमहोदयः, सहसंयोजकः भगवताचार्यः राधेश्याममहोदयः, पर्यवेक्षकः देवेन्द्रशर्मामहोदयः आसीत्।विशिष्टातिथयः जगतरामशर्मामहोदयः, लायकरामशर्मामहोदयः, भूपेशधीमानमहोदया, लायकरामकंवरमहोदयः च आसन्।

संस्कृत- शिक्षक- परिषदः सिरमौरजनपदस्य कार्यकारिणी- सदस्याः, विभिन्नविद्यालयानां संस्कृत- अध्यापकाः अपि कार्यक्रमे उपस्थिताः आसन्।

### श्लोकोच्चारण- प्रतियोगितायाम्

प्रथमं स्थानं प्रतिज्ञा (राजकीय उच्च विद्यालयः, सिरमौरी-ताल), प्राप्तवती। अवनीत-कौर द्वितीयं स्थानं भारती देवी (राजकीय वरिष्ठ माध्यमिक विद्यालयः, अम्बोया), तृतीयं स्थानम् अभिनव राणा (राजकीय उच्च विद्यालयः, धार) इत्येते विद्यार्थिनः स्थानानि प्राप्तवन्तः।

### मन्त्रोच्चारण-प्रतियोगितायाम्

प्रथमं स्थानं तेजस्वी (राजकीय वरिष्ठ माध्यमिक विद्यालयः, भंगानी), द्वितीयं स्थानं आदित्य शर्मा (दून- वैली- इंटरनेशनल- पब्लिक- स्कूलः, राजबन) नवजोत चौधरी (राजकीय उच्च विद्यालयः, बागरण), तृतीयं स्थानं सभ्यशर्मा (राजकीय उच्च विद्यालयः, सिरमौरी-ताल) इत्येते प्राप्तवन्तः।

### भाषण-प्रतियोगितायाम्

प्रथमं स्थानं रवीना, द्वितीयं स्थानं स्मृतिः, तृतीयं स्थानं पीहू इत्येते विद्यार्थिनः स्थानानि प्राप्तवन्तः।

### संस्कृत-गीतिका-प्रतियोगितायाम्

प्रथमं स्थानं समृद्धिः, द्वितीयं स्थानं आर्यन तोमर (राजकीय- माध्यमिक- विद्यालयः, निहालगढः), तृतीयं स्थानं वंदना शर्मा (दूनवैली, पांवटा साहिबः) इत्येते स्थानानि प्राप्तवन्तः। कार्यक्रमे धनवीरशर्मा, गोविंदशर्मा, दिलीपवशिष्ठः, संजयचौधरी, कमलेशशर्मा, रजनीशशर्मामहोदयः, चंबेलचौधरी, अमितशर्मा, सतीशशर्मा, रोशनशर्मा सुनीलशर्मा सोमप्रकाशः इत्यादयः बहवः गण्यमान्याः जनाः उपस्थिताः आसन्।

# नवदेहल्यां भारत-यूरोपीय-सङ्घयोः
## सामरिक सम्बन्धः सुदृढः भवितुं सज्जः अस्ति



अग्रिमे सप्ताहे नवदेहल्यां यूरोपीय-सङ्घ-भारत-शिखरसम्मेलने नूतन-सुरक्षा-रक्षा-सहभागितायाः हस्ताक्षरेण, भारत-यूरोपीय-सङ्घयोः सामरिक सम्बन्धः सुदृढः भवितुं सज्जः अस्ति। यूरोपीयसङ्घस्य विदेश-नीति-विभागस्य प्रमुखः काजा-कल्लास-इत्येषा फ्रान्स-देशस्य स्ट्रास्बर्ग-नगरे यूरोपीयसंसदि अघोषितवती। सा अवोचत् यत्, इयं सन्धिः भारत-प्रशान्तक्षेत्रे स्थिरतायै केन्द्रीकृतं समुद्रीयसुरक्षायां, आतङ्कवाद-निरोधे, साईबर-सुरक्षायां, समुद्रीयक्षेत्र-जागरूकतायां च प्रमुखक्षेत्रेषु सहयोगं सुदृढं करिष्यति। यूरोपीय सङ्घस्य विदेशनीति-प्रमुखः अवदत् यत् यूरोप्-देशः भारतेन सह शक्तियुतं नूतनं कार्यसूचीं दातुं सज्जः अस्ति, यूरोपीय-सङ्घः भारतस्य वृहत्तमेषु व्यापारसहभागिषु अन्यतमः अस्ति इति। अग्रिमे सप्ताहे यूरोपीय-आयोगस्य अध्यक्षस्य उर्सुला वॉन् डेर् लेयेन् इत्यस्य, यूरोपीय परिषदः अध्यक्षस्य एन्तोनियो कोस्टा इत्यस्य च भारतयात्रायाः समये सहभागित्वेषु हस्ताक्षरं भविष्यति, यत्र ते गणतन्त्रदिवस-समारोहे मुख्यातिथी भविष्यतः। नेतारौ अस्मिन् मासे सप्तविंशति दिनाङ्के प्रधानमन्त्रिणा नरेन्द्रमोदिना सह षोडशतमे भारत-यूरोपीयसङ्घस्य शिखरसम्मेलने सह-अध्यक्षतां करिष्यतः।

# प्रधानमन्त्री-ग्राम-सडक-योजना




प्रधानमन्त्री-ग्राम-सडक-योजनायाः चतुर्थ-चरणस्य अन्तर्गतं जम्मू-कश्मीर, छत्तीसगढ, उत्तराखण्ड, राजस्थान, हिमाचलप्रदेश, सिक्किम इत्येतेषु प्रदेशेषु दशसहस्र कि. मी. तोप्यधिकाः मार्ग-परियोजनाः सर्वकारेण अनुमोदिताः सन्ति। एते मार्गाः पूर्वं पृथग्भूताः प्रायः सप्तत्यधिक द्विशतोत्तर त्रिसहस्र निवासस्थानानि योजयन्ति, येन आवश्यकसेवानां प्राप्तिः वर्धते।

# बैडमिण्टन्-क्रीडायां भारतीय-क्रीडकौ पी. वी. सिन्धु, लक्ष्यसेनः च इण्डोनेशिया-मास्टर्स-
## प्रतियोगितायाः प्रागुपान्त्यचक्रीय द्वन्द्वे प्रविष्टवन्तौ



**हिमसंस्कृतवार्ताः** - बैडमिण्टन्-क्रीडायां भारतीय-क्रीडकौ पी. वी. सिन्धु, लक्ष्यसेनः च इण्डोनेशिया-मास्टर्स-प्रतियोगितायाः प्रागुपान्त्यचक्रीय द्वन्द्वे प्रविष्टवन्तौ। लक्ष्यः पुरुष एकल प्र-प्रागुपान्त्यचक्रीय द्वन्द्वे हांगकांग-देशस्य जेसन गुनावन इत्येतं एकविंशति-दश, एकविंशति-एकादश इत्याङ्कैः पराजितवान्।

# धर्मशालायां नेता प्रतिपक्षः जयरामठाकुरः गर्जितवान्, राज्यसर्वकारं प्रति तीव्रं वाचिकं प्रहारं कृतवान्




**हिमसंस्कृतवार्ताः- धर्मशाला** ।धर्मशालायाम् आयोजिते एकस्मिन् कार्यक्रमे नेता प्रतिपक्षः, पूर्वमुख्यमन्त्री च जयरामठाकुरः प्रदेशसर्वकारं प्रति तीव्रम् आक्रमणं कृतवान्। सः अवदत् यत् मण्डीनगरे सर्वकारेण उत्सवकार्येषु दशकोटिरूप्यकाणि व्ययीकृतानि, यदा एषा राशि दरिद्रपरिवाराणां कल्याणाय व्ययिता भवितव्या आसीत्। तेन आरोपः कृतः यत् एच.आर.टी.सी. द्वारा द्विकोटि-रूप्यकाणां विधेयकं प्रेषितम् अस्ति, यस्मिन् पञ्चाशत्- प्रतिशतम् अग्रिमभुगतानस्य प्रावधानं वर्तते।जयरामठाकुरः अवदत् यत् सर्वकार रात्रेः अन्धकारे प्रकरणानि निस्तारयितुं धमकीं ददाति, किन्तु वास्तवतः अधुना दिवसे एव तानि निस्तारयितुं कार्यम् आरब्धम् अस्ति। तेन प्रश्नः कृतः यत् यदा मुख्यमन्त्रिणः स्वयमेव सम्बन्धितः विभागः अस्ति, तर्हि विजिलेंस-अन्वेषणस्य आदेशाः किमर्थं दत्ताः, डी. जी. पी. द्वारा एस. आई. टी. गठनस्य निर्देशाः किमर्थं निर्गताः?
व्यङ्ग्यं कुर्वन् सः अवदत्- ये मन्त्री अधुना काले उच्चनेतृत्वेन सह मिलित्वा आगताः सन्ति, किं ते एव सन्ति ये मण्डीनगरे असन्तोषं प्रकटितवन्तः? सः अपि पृष्टवान् यत् या अन्वेषणे एव स्थगिता आसीत्, तस्य किं परिणामः अभवत्। नेता प्रतिपक्षः अवदत् यत् एकः मन्त्री कस्यचित् अधिकारिणः विरुद्धं वक्तव्यं ददाति, अपरः तु वदति यत् कार्यं साधयितुं कौशलम् आवश्यकम्। अधिकारिणः राज्यहिताय कार्यं कुर्वन्तु, किन्तु सार्वजनिकमञ्चेषु एवं प्रकारस्य टिप्पणीः किमर्थं आवश्यकाः?जयरामठाकुरः आरोपं कृतवान् यत् ये अधिकारिणः तस्य सर्वकारेण दूरं स्थापिता आसन्, ते एव अद्य मुख्यमन्त्रिणम् अङ्गुलीषु नर्तयन्ति। गम्भीराः आरोपाः आरोपिताः सन्ति, तथापि सर्वकार तेषां सम्बन्धात् मुक्तिं प्राप्तुं न शक्नोति। तेन दावः कृतः यत् त्रिवर्षीयकार्यकाले सर्वकारस्य उपलब्धयः शून्याः एव सन्ति। सः अपि अवदत् यत् प्रदेशे सांविधानिकपदानां गरिमा अपि न पाल्यते। कस्यचित् अध्यक्षस्य मन्त्रीरूपेण परिचयः दीयते, यदा मन्त्रीपदं सांविधानिकं पदम् अस्ति।
कानून-व्यवस्थां प्रति संकेतं कुर्वन् सः अवदत् यत् प्रदेशे स्थितयः दयनीयाः सन्ति। क्वचित् चिकित्सकः रोगिणं प्रहरति, क्वचित् रोगी चिकित्सकं प्रहरति। प्रथमं सेवानिरस्तीकरणं भवति, पश्चात् पुनः सहमति क्रियते। एतत् अविचारितनिर्णयानां परिणामः एव। जयरामठाकुरः आरोपं कृतवान् यत् आपत्तिकाले केन्द्रीयसर्वकारेण प्रदेशस्य निरन्तरं साहाय्यं कृतम्, किन्तु प्रदेशसरकारेण धन्यवादोऽपि न कृतः। राज्यसभानिर्वाचनं प्रति सः अवदत् यत् यदा यदा एतत् निर्वाचनं आगच्छति, तदा तदा तनावः वर्धते। यदि अस्मिन् अपि काले किञ्चित् भवेत्, तर्हि अस्मान् दोषं मा दत्तेति सः अवदत्।पञ्चायतीराजसंस्थायाः निर्वाचनविषये न्यायालयनिर्णयेषु टिप्पणीं सः अनुचितां मन्यते स्म, तथा अवदत् यत् अस्मिन् विषये न्यायालयेन स्वयमेव संज्ञानं ग्रहीतव्यम्।

## अद्य निर्वाचनं चेत् काङ्ग्रेसस्य प्रचण्डः पराजयः निश्चितः- जयरामः

सः उक्तवान् यत् यदि अद्य निर्वाचनं भवेत्, तर्हि काङ्ग्रेसदलस्य निश्चितं प्रचण्डः पराजयः स्यात्, तस्य लोकप्रियता च अधःपातं गता अस्ति। मनरेगायां परिवर्तने विषये सः अवदत् यत् अस्मिन् योजनायां पूर्वमपि अनेकवारं परिवर्तनानि कृतानि सन्ति। वी. बी. जी. रामजी- विरोधस्य किमपि औचित्यं नास्तीति सः स्पष्टं कृतवान्।

# महाविद्यालयेषु शिक्षकाणां ४०० पदानि पूरयिष्यन्ते; लोकसेवा-आयोगाय प्रेषितं प्रकरणम्




**हिमसंस्कृतवार्ताः- शिमला।** प्रदेशस्य 'उपाधि' महाविद्यालयेषु शिक्षकाणां ४०० पदानि पूरयिष्यन्ते। अस्मिन् विषये उच्चशिक्षाविभागेन प्रदेश-लोकसेवा-आयोगाय (HPPSC) पत्रं लिखितम्, एतां प्रक्रियां शीघ्रं पूर्णं कर्तुं सूचितम्, येन महाविद्यालयेषु शिक्षकाणां न्यूनता निवारिता भवेत्। आशा अस्ति यत् अप्रैल- मासं यावत् एषा प्रक्रिया पूर्णा भविष्यति।यद्यपि एतानि पदानि पर्याप्तानि न सन्ति, यतः वर्तमाने समये महाविद्यालयेषु शिक्षकाणाम् अनेकानि स्थानानि रिक्तानि सन्ति। प्रदेशस्य ४५ महाविद्यालयेषु केवलं ४-५ शिक्षकाः एव कार्यरताः सन्ति, येन छात्राणां पाठनं प्रभावितं भवति। प्रतिवर्षं बहुसंख्याकाः शिक्षकाः सेवानिवृत्ताः भवन्ति, परन्तु नियुक्तयः प्रायः वर्षत्रयानन्तरं जायन्ते। यूजीसी (UGC) नियमानुसारं २० छात्रेषु एकः शिक्षकः अनिवार्यः अस्ति। नूतनशिक्षानीत्याः (NEP) सफल- क्रियान्वयनाय अपि महाविद्यालयेषु पर्याप्तशिक्षकाणाम् आवश्यकता वर्तते। उल्लेखनीयं यत् २०२३ तमानन्तरम् इदानीं ४०० पदानि पूरयिष्यन्ते।

## सीबीटी केन्द्रेषु पर्याप्तं 'हार्डवेयर' उपलब्धं कर्तुं निर्देशः

उच्चशिक्षाविभागेन सर्वेषां महाविद्यालयानां प्रधानाचार्यान् प्रति निर्देशः कृतः यत् सीबीटी (कम्प्यूटर-आधारित-परीक्षण) केन्द्रेषु पर्याप्तं ICT हार्डवेयर उपलब्धं भवेत्। उच्चशिक्षा- निदेशकः डॉ. अमरजीतकुमारशर्मा महोदयः अज्ञापयत् यत् सूचना एवं सञ्चार प्रविधि (ICT) सम्बद्धा आधारभूतसंरचना पूर्णतया कार्यशीला भवेत्, येन परीक्षासम्बद्धकार्येषु कोऽपि अवरोधः न भवेत्। यदि कम्प्यूटर-यन्त्रेषु कापि त्रुटिः अस्ति, तर्हि सा त्वरितं निवारणीया।

## चयन-आयोगस्य (HPSCA) प्रतिवेदने काश्चन त्रुटयः प्रकटिताः

हिमाचलप्रदेश- राज्य- चयन- आयोगः (हमीरपुरं) सूचितवान् यत् केषुचित् सर्वकारीय- महाविद्यालयेषु, ये 'CBT' केन्द्ररूपेण चिह्निताः सन्ति, तत्र काश्चन न्यूनताः सन्ति। अतः विभागेन एतेषां केन्द्राणां सुचारुसञ्चालनाय तत्काल- परिष्कारात्मक- कार्यविधये आदेशाः दत्ताः।




हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

नन्दिनीः नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
काव्याः नमस्ते नन्दिनि। श्रूयताम्। आगरा-नगरे कैश्चित् युवकैः वसतिगृहस्य प्रकोष्ठः ध्वस्तः। तैः शय्या-वस्तूनि क्षिप्तानि। "पञ्चशत-रूप्यकाणां पूर्णः उपयोगः कृतः" इति तैः प्रोक्तम्। तत् दृष्ट्वा जनैः कोपः प्रकाशितः।
नन्दिनीः तत् अशोभनीयम्। किन्तु अन्यत्र जनानां व्यवहारः उत्तमः दृश्यते। किम् अन्यत् वृत्तम्?
काव्याः आम्। उत्तर-पूर्व-भारतस्य रेलयाने यात्रिकैः अवकरः स्यूतेषु स्थापितः। न तु क्षिप्तः। तैः यानं स्वच्छं रक्षितम्। एतत् दृष्ट्वा देशः प्रसन्नः जातः।
नन्दिनीः एतत् अनुकरणीयम्। सम्बन्धानां विषयः अपि चर्चनीयः खलु?
काव्याः सत्यम्। एकेन औस्ट्रेलिया-देशीयेन नरेण प्रोक्तम् यत् अत्र मित्र-सम्बन्धः भिन्नः। मित्रेण मित्रस्य बहु-साहाय्यं क्रियते। तत् तस्मै "न सामान्यम्" इति भातम्। तेन भारतीय-स्नेहः श्लाघितः।
नन्दिनीः एषः स्नेहः प्रशंसनीयः। किन्तु विदेशेषु धनप्राप्तिः सुकरा किम्?
काव्याः न खलु। तत्रस्थेन एकेन भारतीयेन द्वादश-होरा-पर्यन्तं भाटक-यानं चालितम्। तेन धनं तु अर्जितं, किन्तु "तत् न सरलम्" इति निवेदितम्। तेन श्रमः अनुभूतः।
नन्दिनीः सत्यम्। श्रमेण विना न किमपि लभ्यते। अस्तु। अद्यतनी वार्ता-धारा अत्रैव समाप्ता। पुनर्मिलिष्यामः।
काव्याः धन्यवादः नन्दिनि। पुनर्मिलिष्यामः। नमो नमः।

# सुलह-विधानसभाक्षेत्राय कोटिरूप्यकाणां उपहारः, मुख्यमन्त्रिणा १४ विकासपरियोजनानाम् उद्घाटनं शिलान्यासः च कृतः







**हिमसंस्कृतवार्ताः- पालमपुरम्।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खूमहोदयः काङ्गडाजनपदस्य सुलह-विधानसभाक्षेत्रस्य एकदिवसीयभ्रमणकाले प्रायः ७६.४१ कोटिरूप्यकाणां १४ विकासपरियोजनानां लोकार्पणं शिलान्यासं च कृतवान्। अस्मिन् अवसरे सः 'सुलह' इत्यत्र नूतनस्य तहसील-कार्यालयस्य अपि उद्घाटनं कृतवान्। मुख्यमन्त्रिणा हमीरपुर- सुजानपुर- थुरल- मराण्डा मार्गे मौल-खड्डे १२.५७ कोटिरूप्यकाणां व्ययेन निर्मितस्य द्वि-पथीय-सेतोः (Two- lane bridge) तथा मलाग-मलाहा सम्पर्कमार्गे ३.५७ कोटिरूप्यकाणां व्ययेन निर्मितस्य सेतोः लोकार्पणं कृतम्। सः अन्येषां भवनानां यथा धीराक्षेत्रे संयुक्त- कार्यालय- भवनस्य (१०.८२ कोटिः), सामुदायिक- स्वास्थ्यकेन्द्रस्य (५.०२ कोटिः) तथा अन्यानां पशु- चिकित्सालयानां स्वास्थ्य- उपकेन्द्राणां च उद्घाटनं कृतवान्।

अतिरिक्तं, सः तहसील-पालमपुरे झरेत-राजहूं तथा परौर-खरोत इत्यत्र पेयजलापूर्ति-योजनानां (५.४५ कोटिः) अन्यग्रामानां कृते ३१.६९ कोटिरूप्यकाणां महत्याः जलवितरणप्रणाल्याः उद्घाटनं कृतवान्। सः २.८७ कोटिरूप्यकाणां व्ययेन मौल-खड्डे निर्मास्यमाणस्य नूतनसेतोः तथा गग्गल-स्थितस्य राजकीयविद्यालयस्य नूतनपरिसरस्य (२ कोटिः) आधारशिलां (Foundation stone) अपि स्थापितवान्।

## सुलह-क्षेत्रस्य सर्वाभ्यः पात्रमहिलाभ्यः १५०० रूप्यकाणि प्रदास्यन्ते - मुख्यमन्त्री

मुख्यमन्त्री सुलह-विधानसभाक्षेत्रस्य सर्वाभ्यः पात्रमहिलाभ्यः 'इन्दिरा गान्धी प्यारी बहना सुख सम्मान निधि' योजनान्तर्गतं प्रतिमासं १५०० रूप्यकाणि दातुं घोषणां कृतवान्। सः सुलहक्षेत्रे 'विद्युत-बोर्ड' इत्यस्य विभागं (Division) स्थापयितुं, भवारना क्षेत्रं 'नगरपञ्चायत' इति रूपेण परिणतुम् अपि घोषणां कृतवान्।सः अवदत् यत् काङ्गडा-विमानपत्तनस्य विस्तारीकरणेन क्षेत्रे आर्थिकसमृद्धिः आगमिष्यति पर्यटनं च वर्धिष्यते। अनेन युनः स्वक्षेत्रे एव जीविकां प्राप्स्यन्ति, तेषां च देहली-चण्डीगढ़ादीनि नगराणि प्रति गमनस्य आवश्यकता न भविष्यति।

## अग्निवीराणां कृते आरक्षकेषु (Police) ८०० पदानि आरक्षितानि

एकस्यां विशालजनसभायां मुख्यमन्त्री अवदत् यत् अग्निवीर-योजनायाः कारणेन हिमाचलस्य तरुणानां सेनां प्रति मोहभङ्गः जायते। अतः राज्यसर्वकारः ८०० आरक्षकाणां (Police Constables) नियुक्ति-प्रक्रियायां अग्निवीरान् अपि नियोजयिष्यति। तेभ्यः ५८ वर्षपर्यन्तं वृत्तिः (Job) OPS (Old Pension Scheme) अपि प्रदास्यते। सः उक्तवान् यत् वयम् तादृशीं नीतिं न इच्छामः यया चतुर्वर्षाणां परं तरुणानां भवितव्यं अन्धकारमयं भवेत्।

## शिक्षाक्षेत्रे गुणात्मकः परिष्कारः

मुख्यमन्त्रिणा पूर्वतन-भाजपि-सर्वकारस्य आलोचना कृता यत् बजट-कर्मचारीणां च अभावे एव विद्यालयाः उद्घाटिताः, येन शिक्षायाः स्तरः २१ तमे स्थाने पतितः। सः गौरवपूर्वकं उक्तवान् यत् वर्तमानसर्वकारस्य प्रयासैः हिमाचलः अद्य पञ्चमे (५) स्थाने अस्ति। इदानीं प्रथमवर्गात् एव 'आङ्ग्ल- माध्यमेन' (English Medium) पाठनम् आरब्धं तथा च २०० अधिकाः विद्यालयाः CBSE पाठ्यक्रमेण युक्ताः क्रियन्ते।

# कोटलाबेहड़ क्षेत्रस्य उद्धाराय उपमण्डलाधिकारी कार्यालयः आवश्यकः, मुख्यमन्त्री कुर्यात् पुनः अधिसूचना- समाजसेवकः रमेशचन्द शर्मा



**हिमसंस्कृतवार्ताः जसवां (कांगड़ा) :** जसवां परागपुरविधानसभाक्षेत्रे उपमण्डलाधिकारी कार्यालयः नागरिकः इत्यस्य अभियाचना पुनः एकबारं चर्चायामस्ति। अस्याः चर्चायाः कारणं जनवरी २५ दिनांके मुख्यमन्त्रिणः सुखविन्दरसिंहस्य प्रागपुरे आगमनमस्ति। यत्र प्रागपुरक्षेत्रे जनानां मुखेषु उपमण्डाधिकारी कार्यालयस्य अभियाचना चर्चायाः विषयः अस्ति, तत्रैव जसवां क्षेत्रे कोटलाबेहड़ स्थाने अपि पूर्वस्मिन् भाजपादलस्य सर्वकारे उद्घाटितस्य उपमण्डाधिकारी कार्यालयस्य अधिसूचनायाः निरस्तीकरणानन्तरं पुनः कार्यालयम् उद्घाटनाय जनानां स्वराः तीव्राः सन्ति। अस्मिन्नेव क्रमे जसवां क्षेत्रस्य स्वयंसेविना रमेश चन्द शर्मणा स्वीये वक्तव्ये उक्तं यत् यदि कांग्रेससर्वकारः जसवां क्षेत्रस्य उत्थानम् इच्छति तर्हि पुनः जसवां क्षेत्रे उपमण्डलाधिकारी कार्यालयस्य उद्घाटनस्य घोषणा कुर्यात् मुख्यमन्त्री, तेनोक्तं यत् गतसर्वकारे उद्योगमन्त्रिणा बिक्रमठाकुरेण जसवां प्रागपुरविधानसभायां रक्कड़ क्षेत्रे जसवां क्षेत्रे च द्वौ उपमण्डाधिकारी कार्यालयौ उद्घाटितौ आस्ताम्, परञ्च वर्तमानसर्वकारेण उभौ कार्यालयौ पिहितौ। तेन सह डाडासीबा क्षेत्रे खण्डविकासाधिकारिणः कार्यालयस्य अधिसूचना अपि निरस्तीकृता। श्रीरमेशशर्मणा उक्तं यत् जसवां विधानसभायाम् एकमपि सर्वसौविध्ययुक्तः आधुनिकः चिकित्सालयः न अस्ति, अतः कांग्रेससर्वकारेण अस्मिन् विषयेऽपि ध्यानं दातव्यं स्यात्। ध्यातव्यं स्यात् यत् श्रीरमेशशर्मणः स्वीये क्षेत्रे महद् योगदानम् अस्ति, तेन लोकनिर्माणविभागस्य मण्डलकार्यालयस्य कृते भूमेः दानमपि कृतम्।

# हिम-चण्डीगढ़म्' नगरस्य कृते ३४२८ बीघा भूमिः आवंटिता; हिमुडा (HIMUDA) अधुना 'ड्रोन-सर्वेक्षणं' करिष्यति



**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशसर्वकारः सोलन-जनपदस्य बद्दी क्षेत्रस्य समीपे शीतलपुरे एकं नूतनं नगरं स्थापयितुं सज्जः अस्ति। एतत् नगरं 'हिम-चण्डीगढ़म्' इति नाम्ना प्रसिद्धं भविष्यति। जनपदप्रशासनेन एतदर्थं 'हिमुडा' (HIMUDA) संस्थायै ३,४२८ बीघा भूमिः आवण्टिता। एतदतिरिच्य 'कामन-पूल' (Common Pool) इत्यस्य प्रायः ५-६ सहस्रं बीघा भूमिः अपि चिह्निता अस्ति। गुरुवासरे राजस्वमन्त्रिणः जगत् सिंह नेगी महोदयस्य अध्यक्षतायां आयोजितस्य मन्त्रिमण्डलीय-उपसमित्याः उपवेशने अस्य विषये विस्तरेण चर्चा कृता। सोलन-जनपदस्य उपायुक्तः (DC) मनमोहन शर्मा महोदयः 'प्रस्तुतिम्' (Presentation) दत्तवान्। सः अवदत् यत् हिमुडा तथा राजस्वविभागः मिलित्वा कार्यं करिष्यतः। एकमासाभ्यन्तरे भूमेः एकत्रीकरणं (Consolidation) कृत्वा एकः खण्डः (Chunk) निर्मितः भविष्यति। हिमुडा शीघ्रमेव 'ड्रोन-सर्वेक्षण' प्रविधिना मानचित्रं (Mousabi) डिजिटलाइज (Digitize) करिष्यति।

## शिमला-नगरात् राष्ट्रियमार्ग-समीपे स्थानान्तरिताः भविष्यन्ति विपण्यः

राजधान्यां शिमलायां जनसम्मर्दं न्यूनीकर्तुं सर्वकारेण नवीना योजना रचिता। नगरस्य सम्मर्द-न्यूनतायै शाकमण्डी (Lower Bazar), धान्यमण्डी, काष्ठमण्डी (Timber Market), कच्ची-घाटी यान्त्रिक-विपण्यं तथा च परिवहन-क्षेत्रं (Transport Area) अन्यत्र स्थानान्तरितं भविष्यति। 'फोरलेन' (Four-lane) मार्गस्य समीपे एतदर्थं स्थानं चितम् अस्ति। शिमला-उपायुक्तः अनुपम कश्यपः अवदत् यत् ढली-फोरलेन मार्गे पञ्च स्थानानि चिह्नितानि सन्ति।

## ग्रामीणक्षेत्रेषु अपि अधुना नियमानुसारं भविष्यति भवननिर्माणम्

प्रदेशस्य ग्रामीणक्षेत्रेषु अपि अधुना भवननिर्माणं नियमानुसारं भविष्यति। भवननिर्माणाय मानचित्रं (Map) निर्मातव्यं भविष्यति, पञ्चायतेभ्यः च एतदर्थं शक्तिः प्रदास्यते। राजस्वमन्त्रिणः अध्यक्षतायां जातस्य उपवेशने एतस्य उपरि गम्भीरा चर्चा अभवत्। उपवेशने भवनानां उच्चता, नदी-नाल-खड्डेभ्यः दूरी, 'सेट-बैक' (Set-back) क्षेत्रं तथा च 'लाइन-डायाग्राम' (Line diagram) इत्यादीनां विषयाणां उपरि नियमाः प्रस्ताविताः।अस्मिन् उपवेशने मन्त्रिणः राजेश धर्माणी, विक्रमादित्य सिंहः, हिमुडा-मुख्यकार्यकारी अधिकारी सुरेन्द्र वशिष्ठः, पञ्चायतीराज-निदेशकः राघव शर्मा च उपस्थिताः आसन्।

# भारतीयज्ञानपरम्परायां वसन्तपंचमीपर्वणः आध्यात्मिकं वैज्ञानिकं च दृष्टिकोणम्



डॉ खुशेन्द्र देव चतुर्वेदी
सहायकप्राध्यापकः, ज्योतिषविभागः
महर्षिमहेशयोगीवैदिकविश्वविद्यालयः,
ब्रह्मस्थानं-करौंदी, कटनी, मध्यप्रदेशः।

महर्षि महेश योगी वैदिक विज्ञानानुसारं संपूर्णं सृष्टिः पंचमहाभूतेभ्यः (पृथ्वी, जलम्, अग्निः, वायुः, आकाशः) निर्माणं जातम्। बसंत- ऋतौ अग्नितत्त्वं सक्रियं भवति, वायुतत्त्वस्य गतिः वर्धते, पृथ्वीतत्त्वम् उर्वरं भवति। एतद् कारणेन बसंत ऋतौ वृक्षेषु नवपल्लवाः, पुष्पाणि, फलानि, पक्षिणः, मधुमक्षिकाः सक्रियाः भवन्ति। अयम् ऋतुः सृजनस्य, या वैदिकदृष्ट्या सृष्टिचक्रानुसारं वर्तते।
भारतीयपंचांगस्य पर्वेषु बसंतपंचमी अत्यंत महत्त्वं धारयति। एतत् पर्व माघमासस्य शुक्लपक्षस्य पंचम्यां तिथौ आचर्यते। केवलं वसंतपंचमी ऋतुपरिवर्तनस्य उत्सवः न, अपितु प्रकृतेः चेतना, ज्ञानं, सृजनात्मकशक्तेः च जागरणस्य प्रतीकः अस्ति।
ऋग्वेदे सरस्वती नदी, बुद्धिः, वाणी इति त्रिषु रूपेषु स्वीकृता अस्ति। बसंतपंचमीदिने प्रकृतौ यत्कम्पनं भवति, तत् मानसिकसाफल्यं शिक्षणस्य च क्षमतां वर्धयति। अतः एतस्मिन् दिने विद्या आरंभः, अक्षराभ्यासः, शास्त्राध्ययनस्य च विशेषं महत्वं वर्तते।

## पीतवर्णस्य वैज्ञानिकं वैदिकं च महत्त्वम्

बसंतपंचमीदिने पीतवस्त्राणि, पीतभोजनं, पीतपुष्पाणि च उपयोगे स्वीक्रियन्ते। पीतवर्णः बृहस्पतिना सम्बद्धः, ज्ञानस्य, विस्तारस्य, सात्विकतायाः, आशावादस्य च प्रतीकः अस्ति। अतः वसंतपंचमीदिने पीतवर्णस्य महत्त्वं वर्धते। पीतवर्णः मस्तिष्के सेरोटोनिनं सक्रियं करोति, अवसादं न्यूनं करोति, एकाग्रतां च वर्धयति।

## सूर्यस्य उत्तरायणगतिः-

बसंतपंचमीपर्यन्तं सूर्यः उत्तरायणे पूर्णतः सक्रियरूपेण कार्यं करोति। सूर्यस्य किरणाः साक्षात् पृथ्वीं प्राप्नुवन्ति, विटामिन डी निर्माणं वर्धते, शरीरस्य रोगप्रतिरोधकक्षमता अभिवर्धते। वैदिकज्योतिषे एतत् सूर्यबलस्य वर्धनस्य कालः मन्यते।

## पंचमी तिथेः रहस्यम्

पंचमी तिथिः वैदिकगणनायां बुद्धेः विकासाय, संतुलितनिर्णयाय, सृजनात्मककार्याय च श्रेष्ठा मन्यते। बसंत- ऋतौ रबी इत्यस्य सस्यस्य पक्वावस्थायां वर्तते, सर्षिपं (पीतसस्यम्) क्षेत्रेषु पतंगायन्ते। मधुमक्ष्यः परागं कुर्वन्ति। बसंतपंचमी तिथिः प्रकृतेः कृषकेत्यनयोः सामञ्जस्यस्य पर्व अपि मन्यते।
आधुनिक विज्ञानस्य दृष्ट्या एतस्मात् पर्वणः बायोलॉजिकल क्लॉक, मानवशरीरस्य सर्केडियन रिदम, ऋतुपरिवर्तनात् प्रभाविताः भवन्ति। बसंतऋतौ तन्द्रा न्यूना भवति, ज्ञानप्राप्तेः क्षमता वर्धते, स्मृतिः तीव्रा भवति। अतः प्राचीन- ऋषिभिः अयं समयः सुमुहूर्तः कथितः, सर्वेषां मांगलिककार्याणां च श्रेष्ठः कालः मन्यते।
न्यूरोविज्ञान- अनुसारं बसंतऋतौ सृजनात्मक- मस्तिष्कस्य क्रियाशील केन्द्रम् अधिकं सक्रियं भवति। एतद् कारणेन बहवः कलाकाराः, संगीतज्ञाः च बसंतं सृजनस्य ऋतुः मन्यते। बसंतपंचमी अस्मानन् एतत् शिक्षयति यत् "अज्ञानात् ज्ञानस्य दिशि गमयति, जीवनस्य जड़तां नाशयति, नवीनतां धारयति, प्रकृत्या सह सामंजस्यपूर्णं जीवनं जीव्यते। एतत् पर्व विज्ञानस्य, धर्मस्य, ज्योतिषस्य, मनोविज्ञानस्य च अद्भुतं समन्वयम् अस्ति।
बसंतपंचम्यां वास्तविकः संदेशः यत्र ज्ञानम् अस्ति, तत्र जीवनस्य वसंतः अस्ति। एतत् पर्व प्राकृतिकः, मानसिकः, आध्यात्मिकश्च संतुलनस्य अस्ति। एतत् मानवं स्मारयति यत् ज्ञानप्रकृतिचेतना इत्येतेषां समेषां अत्यन्तप्रभाविताः सन्ति।



डॉ. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्

## "वसन्त पञ्चमी" विशेषः

६४ कलानाम् अधिष्ठात्री देवता सरस्वती। बुद्धिवरदायिनी देवतायाः प्रकटोत्सवः वसन्त पञ्चमी इति। विद्यारम्भरूपेण एष महोत्सवः सर्वे जनाः मन्यन्ते। ऋतुराज इत्यपि वसन्त-ऋतोः नामधेयम्। वृक्षाणां पुरातनानि पर्णानि पतित्वा नूतनानि पर्णानि आगच्छन्ति। सर्वत्र उत्साहपूर्ण वातावरणं दृश्यते। शैत्यं न्यूनं भवति। शैत्यकारणात् बहिर्गमनं जनाः न कुर्वन्ति किन्तु अधुना जनाः 'पाटलशैत्यस्य' अनुभवं कुर्वन्ति। शुभ्रवसनायाः सरस्वत्याः प्रकटोत्सवं जनाः एतस्मिन् ऋतौ एव मान्यन्ते। संस्कृतसाहित्ये एतस्य ऋतोः महत्वर्णनं कृतं कविभिः। मृच्छकटिकनाटके शुद्रकेन एतस्य ऋतोः सुन्दरवर्णनम् आलेखितम्। श्रीकृष्णस्य वृन्दावने होलिकोत्सवः वसन्तपञ्चम्याः एव प्रारभ्यते। आयुर्वेदानुसारं वसन्तर्तु स्वास्थ्यायऽपि उत्तमम्। चैत्र-वैशाखौ मिलित्वा वसन्त-ऋतु इति कथ्यते। सृष्टेः नवनिर्मित्याः कालोऽयम्। नवचैतन्यस्य एषः कालोऽस्ति। आनन्दोत्सवस्य कालोऽयम्। सरस्वत्याः नद्याः तीरे आर्यैः वेदरचना कृता। तदा ज्ञानदात्र्याः सरस्वत्याः मूर्तिः आस्तित्वे आगतवती।
देवीसरस्वती विद्याया अधिष्ठात्री देवता अस्ति | सा चतुष्षष्टि कलासु अपि देवताऽस्ति। किन्तु अन्ये देवेषु सरस्वत्याम् च एकप्रमुखः भेदोऽस्ति। अन्ये देवा कस्यापि कुलस्य देवता दृश्यन्ते किन्तु सरस्वती कस्यापि कुलस्य कुलदेवता न वर्तते. सरस्वत्या मन्दिराणां संख्याऽपि न्यूना एव तथैव सरस्वत्योपरि ग्रंन्थरचना अल्पैव दृश्यते। विद्यायाः कारणेन सा सर्वेषाम् देवताऽऽस्ति। सरस्वत्या अर्थ उज्ज्वलः इति, तेन कारणेन सा चारित्र्यस्य, शुभ्रतायाः, धवलतायाः च प्रतीकं मन्यते।
**"पावका नः सरस्वती वाजेभिर्वाजिनीवती, यज्ञं वष्टु धिया वसुः।।" {ऋ.मं. १. ५. १०}**
सुभाषितेषु बहूनि रूपाणि वयं द्रष्टुं शक्नुमः। यथा-
"पातु वो निकषग्रावा मतिहेम्नः सरस्वती।।"
"प्राज्ञेतपरिच्छेदं वचसैव करोति या।।"
मूर्खाणां विदुषां च अन्तरं वयं वाग्देवताया सरस्वत्याः अनुसारमेव द्रष्टुं शक्यते। अहं सरस्वतीं प्रणमामि।

# मिथिलायाः वैदिकपरम्परायाः सजीवरूपं महाराज्ञ्याः कामसुन्दरीदेव्याः द्वादशाश्राद्धकर्म

हिमसंस्कृतवार्ताः- राघवनाथः झा, दरभङ्गा।

मिथिलायाः प्राचीनवैदिक- राजसीय- परम्परानुसारं महाराज्ञ्याः कामसुन्दरीदेव्याः द्वादशाश्राद्धकर्म कल्याणीनिवासे दरभङ्गायां गरिमामये वातावरणे सम्पन्नम्। अस्मिन् अवसरे बिहारराज्यस्य राज्यपालः डॉ. आरिफमोहम्मदखानः कल्याणीनिवासम् आगत्य महाराज्ञ्याः चित्रे पुष्पाञ्जलिं समर्पितवान्। युवराजः कपिलेश्वरसिंहः युवराजश्च राजेश्वरसिंहः माननीयस्य राज्यपालस्य पारम्परिकस्वागतं कृतवन्तौ। महाराज्ञ्याः कामसुन्दरीदेव्याः निधनं जनवरीमासस्य द्वादशे दिनाङ्के अभवत्। द्वादशाश्राद्धकर्मणः अवसरे दरभङ्गाराजपरिवारेण समग्रः मिथिलासमाजः आमन्त्रितः आसीत्। अनुमानतः त्रिंशत्सहस्रात् चत्वारिंशत्सहस्रपर्यन्तं श्रद्धालवः, गणमान्यनागरिकाः च अस्मिन् अनुष्ठाने सहभागिनः अभवन्। श्राद्धकर्म सम्पूर्णतया वैदिकविधिविधानानुसारं मिथिलापरम्परानुसारं च सम्पन्नम्। विशेषरूपेण उल्लेखनीयं यत् श्राद्धकर्मणि *प्रयुक्ताः स्थाल्यः, बात्यः, पात्रम्, चषकाः च सर्वे रजतनिर्मिताः आसन्।* संस्कृतपरम्परायां "रजतम्" शुद्धतायाः सात्त्विकतायाश्च प्रतीकं मन्यते। अद्यतनकाले रजतपात्राणां एतादृशः व्यापकः प्रयोगः दुर्लभः मन्यते।श्राद्धकर्मणि देशविदेशेभ्यः आगताः विद्वांसः आचार्याः, महापात्राः, यजमानवर्गाः, कुलभुजः, कर्मकाण्डनिपुणाः पण्डिताश्च उपस्थिताः आसन्। मिथिलायाः विशिष्टपरम्परानुसारं गुनीवर्गस्य भूमिका अपि विशेषमहत्त्वपूर्णा आसीत्। गुनी इति ते विद्वांसः कथ्यन्ते, ये श्राद्धादिषु वैदिकानुष्ठानेषु मन्त्रविधानस्य, कर्मक्रमस्य, परम्परामर्यादायाश्च शास्त्रोक्तं निर्वाहं कुर्वन्ति।
गुरुकुलवासिनां बालकानां वैदिकमन्त्रपाठेन सम्पूर्णः परिसरः वेदमन्त्रनिनादेन प्रतिध्वनितः। पण्डितेभ्यः आचार्येभ्यश्च सम्मानपूर्वकं दानदक्षिणा प्रदत्ता। अतिथीनां कृते षट्पञ्चाशत् प्रकारकैः पारम्परिकैः मिथिलाव्यञ्जनैः युक्ता भोज्यव्यवस्था कृताऽऽसीत्। अस्मिन् अवसरः राज्यपालः डॉ. आरिफमोहम्मदखानः अवदत् यत् शिक्षाक्षेत्रे दरभङ्गाराजपरिवारस्य योगदानं देशः कदापि न विस्मरिष्यति। तेन युवराजयोः सामाजिक- शैक्षिकपरम्पराणां प्रवर्धनाय अपेक्षा प्रकटिता। युवराजौ कपिलेश्वरसिंहः राजेश्वरसिंहश्च अवदताम् यत् राजपरिवारः शिक्षा- क्रीडा- सामाजिकविकासक्षेत्रेषु निरन्तरं कार्यं करिष्यति।
कार्यक्रमे उपेन्द्र झा, रामचन्द्र झा, शिवकान्त झा, देवनारायण झा, शशिनाथ झा इति पञ्च पूर्वकुलपतयः, प्रो. दिलीप झा, प्रो. निरञ्जन मिश्रः, प्रो. दयानाथ झा, वैदिकराजेन्द्र झा, पं. वंशीधर मिश्रः, प्रो. सुरेश्वरझा, प्रो. लक्ष्मीनाथ झा, डॉ. द्वारिकानाथ झा, डॉ. राजनाथ झा, डॉ. त्रिलोक झा, भवनाथ झा, रूपेशकुमार झा इत्यादयः अनेकाः विद्वांसः, आचार्याः, गुनीवर्गीयाश्च उपस्थिताः आसन्।
महाराज्ञ्याः श्राद्धकर्मणि पुरातनमिथिलापरम्परायाः युवमिथिलासंस्कृतेः च समन्वयः दृष्टः, यत्र परम्पराप्रति आदरः तथा आधुनिककालेऽपि वैदिकरीतिरिवाजपालनं स्पष्टतया प्रकटितम्